NBW-001-014403 Seat No. ________

# M. A. (Sem. IV) (CBCS) Examination

April / May – 2017

**Sanskrit : CCT-12**

*(Vedanta)*

*श्रीलौगाक्षिभास्कर विरचितः अर्थसंग्रहः ।*

*सदानन्द प्रणीत – वेदान्तसारः ।*

*(Old Course)*

**Faculty Code : 001**
**Subject Code : 014403**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

૧ નીચેનામાંથી કોઈપણ **બે** ગદ્યખંડોનો અનુવાદ કરો : ૧૪

1 Translate any **two** paragraphs from the following : 14

(૧) अङ्गप्रधान सम्बन्ध बोधको विधिर्विनियोगविधिः । यथा 'दध्ना जुहोती'ति । स हि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नो होमसम्बन्धं विधत्ते । दध्ना होमम्भावयेदिति । गुणविधौ च धात्वर्थस्य साध्यत्वेनैवान्वयः क्वचिदाश्रयत्वेनापि । यथा दध्नेन्द्रियकामस्य जुहुयादित्यत्र दधिकरणत्वेनेनिन्द्रयं भावयेत् । तच्च किन्निष्ठमित्याकाङ्क्षायां सन्निधिप्राप्तहोम आश्रयत्वेनान्वेति ।

(२) एकाङ्गानुवादेन विधियमानयोरप्यङ्गयोरन्तराले विहितत्वं सन्दंशः यथाऽभिक्रमणे । तत्र हि समानयते जुह्वाम् उपभृतस्तेजो वा इत्यादि ना प्रयाजानुवादेन किञ्चिदङ्गं विधाय विधीयते । तदन्तरमपि 'यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भातृव्यान्नुदतेऽभिक्रामं जुहोत्यभिजित्यै' इति तथन्तरं 'यो वै प्रयाजानाम्मिथुनं वेदे' त्यादिना किञ्चिदङ्गं विधाय विधियते । अतः प्रयाजाङ्गमध्येऽभिहितमभिक्रमणं तदङ्गम् ।

(३) यथा प्राजापत्यपश्वङ्गेषु । प्राजापत्या हि वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति वाक्येन तृतीयानिर्देशात्सेतिकर्तव्यताका एककालत्वेन विहिताः । अतस्तेषां तदङ्गानां चांपाकरणनियोजनप्रभृतीनां साहित्यं सम्पाद्यम् । तच्च प्राजापत्यपशूनां सम्प्रतिपन्नदेवताकत्वेन युगपदनुष्ठानादुयपद्यते । तदङ्गानां चोपाकरणादीनां युगपदनुष्ठानमशक्यम् ।

(४) इत्थं चानुयाज व्यतिरिक्तेषु यजतिषु ये यजामहमिति मन्त्रं कुर्यादिति वाक्यार्थबोधः नषोऽनुयाजव्यतिरिक्ते लाक्षणिकत्वात् एवं च न विकल्पः । अत्र च वाक्ये ये यजामहमिति न विधीयते । यजतिषु ये यजामहमित्यनेनैव च प्राप्तत्वात् । किन्तु सामान्य शास्त्रप्राप्तये यजामह इत्यनुवादेन तस्यानु व्याजव्यतिरिक्तं विषयत्वं विधीयते ।

૨ નીચેનામાંથી કોઈપણ **બે** ગદ્યખંડોનો અનુવાદ કરો : **૧૪**

**2** Translate any **two** paragraphs of the following : **14**

(१) वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाऽऽधार–भूतानुपहिता–काशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीवमित्युच्यते 'शिवमद्वैतं चतुर्थं मन्यन्ते' इत्यादिश्रुतेः । इदमेव तुरीयं शुद्ध चैतन्यमज्ञानादितदुपहित चैतन्याभ्यां तप्तायः पिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ।

(२) सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसि, कर्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति । ज्ञानेन्द्रियाणि श्रोत्रत्ववचक्षुर्जिह्वा ध्राणा स्यानि । एवान्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते । बुद्धिर्नाम निश्चयात्मिकान्तः करणवृत्तिः मनो नाम संकल्पविकल्पात्मिकाऽन्तः करणवृत्तिः ।

(३) स्थूलभूतानि तु पञ्चीकृतानि । पञ्चीकरणंत्वाकाशादि पञ्चस्वेकैकं द्विधासमं विभज्यतेषु दशषु भागेषु प्राथमिकान् पञ्चभागान् पत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागपरित्यागेन भागान्तरेषु संयोजनम् । तदुक्तम् –

'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैयोजनात्पञ्च पञ्च ते ॥' इति ।

(४) अथ महावाक्यार्थो वर्ण्यते । इदं तत्वमसीति वाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषण विशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षण भावश्चेति । तदुक्तम् –

सामानाधिकरण्यञ्च विशेषण विशेष्यता ।
लक्ष्यलक्षण सम्बन्धः पदार्थप्रत्यगात्मनाम् ॥ इति ।

૩ અર્થસંગ્રહના આધારે સાધનચતુષ્ટ્ય સમજાવો. ૧૪

3 Explain the साधनचतुष्ट्य according to अर्थसंग्रहः. 14

અથવા/OR

૩ अर्थवादस्त्रिधामतः । – સમજાવો. ૧૪

3 Explain – अर्थवादस्त्रिधामतः. 14

૪ વેદાન્તસારમાં નિરૂપિત મહાવાક્યાર્થ સમજાવો. ૧૪

4 Explain महावाक्यार्थः described in वेदान्तसारः. 14

અથવા/OR

૪ वेदान्त શબ્દનો અર્થ સમજાવી, વેદાન્તસારનાં વર્ણ્યવિષયનું સવિસ્તર નિરૂપણ કરો. ૧૪

4 Explain the word वेदान्त and describe fully the contents of वेदान्तसारः. 14

૫ નીચેનામાંથી કોઈપણ **બે** પર ટૂંકનોંધ લખો : ૧૪

5 Write short notes on any **two** of the following : 14

(૧) परिसंख्याविधिः ।

(૨) લૌગાક્ષિભાસ્કરનાં મતે ધર્મલક્ષણ.

(2) धर्मलक्षणः according to लौगाक्षिभास्करः.

(૩) વેદાન્તસારનાં મતે લિંગશરીર.

(3) लिङ्गशरीरम् according to वेदान्तसारः.

(૪) जहल्लक्षणा ।